मुद्रित पृष्ठ : 2 अनुक्रमांक ......................

**आ/सेमे IV/517**

# आचार्य ( चतुर्थ सेमेस्टर ) परीक्षा, 2014-15

## साहित्य ( अलंकार प्रधान शाखा )

## VSA-522

***समयः - घंटात्रयम्*** ***पूर्णाङ्काः - 70***

***( प्रश्नपत्रप्राप्तिसमनन्तरमेव अस्योपरि स्वीयोऽनुक्रमाङ्कः लेख्यः )***

**सूचना** : **सर्वे** प्रश्नाः समानाङ्काः, केचन **चत्वारः** समाधेयाः ।

**1.** पण्डितराजोक्तं दीपकालङ्कारलक्षणं सोदाहरणं व्याख्यात ।

**2.** मममटाचार्योक्तं दीपकालङ्कारलक्षणं पण्डितराजेन कथमालो चितमिति पाठ्यग्रन्थानुरोधेनोपस्थापयत ।

**3.** दीपकालङ्कारविषये आलिङ्गितुं शशिमुखीं च सुधां च पातुमित्यादेः विमर्शिन्यामुदाहृतस्य पद्यस्य खण्डने पण्डितराजस्य का वाचो युक्तिरिति ग्रन्थमनुसृत्य स्फोरणीयम् ।





**4.** रसगङ्गाधरानुसारेण प्रतिवस्तूपमालङ्कारस्य लक्षमोदाहर-णोपस्थापनपूर्वकं दृष्टान्तप्रतिवस्तूपमयोर्भेदे किं बीजमिति निरुपणीयम् ।

**5.** व्यतिरेकालङ्कारस्य लक्षणं सोदाहरणं व्याख्यायास्य भेदान् लिखन्तु ।

**6.** ''उपमानादुपमेखस्य न्यूनत्वेऽपि व्यतिरेकमाह वैलक्षण्य मात्रस्य व्यतिरेकत्वात्'' इत्यस्याः पङ्क्तेः स्फोरणं पाठ्यग्रन्थानुरोधेन विधेयम् ।

**7.** सोदाहरणं श्लेषालङ्कारलक्षणं विलिख्य 'येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधक इति सर्वस्वकारस्योक्तेः पण्डितराजदृष्ट्या विमर्शो विधीयताम् ।

**8.** पाठ्यग्रन्थांशानुसारेणालङ्कारशास्त्रे पण्डितराजस्यावदानमिति शीर्षकेणैको निबन्धोलेख्यः ।।